National Journal of
Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2026; 1(66): 133-134
© 2026 NJHSR
www.sanskritarticle.com

**डॉ. सन्तोषकुमारः**
संस्कृत-अध्यापकः,
राजकीय-उच्च-विद्यालयः सकरेरा,
जिला चम्बा (हिमाचलप्रदेशः)

**Correspondence:**
**डॉ. सन्तोषकुमारः**
संस्कृत-अध्यापकः,
राजकीय-उच्च-विद्यालयः सकरेरा,
जिला चम्बा (हिमाचलप्रदेशः)

# वास्तुशास्त्रस्य सामान्यपरिचयः महत्त्वञ्च

**डॉ. सन्तोषकुमारः**

**वेदोऽखिलो धर्ममूलम्**[1] भारतीयसभ्यतायाः संस्कृतेश्चज्ञानाय वेदानामतीवमहत्त्वं वर्तते। वेदा ईश्वरीयज्ञानस्य भण्डारास्सन्ति इति ज्ञायते। संसारे यावदपिज्ञानं विज्ञानं कलाः विद्याश्च दरीदृश्यन्ते तेषां मूलाधाराः वेदा एव। वेदास्संस्कृतेर्मूलस्त्रोतांसि सन्ति। यथोक्तं मनुना-

**भूतं भव्यं भविष्यञ्च सर्वं वेदात्प्रसिद्धयति ।**[2]

वेदेषु मानवमात्रस्य पारिवारिक-सामाजिक-राष्ट्रीयसमस्यानां सर्वविधं समाधानं वर्तते। इमे वेदा एव धर्मार्थकाममोक्षचतुर्विधपुरुषार्थान् उपदिशन्ति। अत एवैतेषां वेदत्त्वं सम्पद्यते। वेदाश्चत्वारस्सन्ति - ऋग्वेदो यजुर्वेदस्समवेदोऽथर्ववेदाश्चेति। वेदेषु ज्ञान-कर्म-उपासना-आत्मज्ञानादीनां विद्यानां विस्तारः प्राप्यते। वेदस्य चत्वारः उपवेदा अपि सन्ति। तद्यथा- आयुर्वेद-धनुर्वेद-गान्धर्वेद-स्थापत्यवेदाश्च। स्थापत्यवेद एव वास्तुशास्त्रस्य मूलं मन्यते। स्थापत्यवेदोऽयम् अथर्ववेदस्योपवेदः। एवं वक्तुं शक्यते यत् वास्तुशास्त्रस्य वेदैः सह साक्षात् सम्बन्धो वर्तते। वास्तुशास्त्रस्य वेदैः सह द्वितीयः सम्बन्धः षट्सु वेदाङ्गेषु ज्योतिषकल्पाभ्यां मन्यते। वेदार्थमवगन्तुं वेदाङ्गानामध्ययनमत्यावश्यकम्। वेदाङ्गानां महत्त्वमनेनैव ज्ञायते यदस्माकं ऋषिभिः वेदाङ्गानां विन्यासो वेदपुरुषस्य शरीरस्य विविधेष्वङ्गेषु कृतः। तद्यथा-

**छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते**
**ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते।**
**शिक्षाघ्राणं तु वेदस्यमुखं व्याकरणं स्मृतम्**
**तस्मात्साङ्गमधीत्यैव ब्रह्मलोके महीयते।।**[3]

शिक्षा-कल्पं-व्याकरणं-निरुक्तं-छन्दोज्योतिषञ्च षड्वेदाङ्गानि। एकमेकमङ्गमप्यत्यधिकमहत्वपूर्ण-मस्ति। स्थापत्यकलायाः प्रारम्भिकी चर्चा कल्पसूत्रान्तर्गतं शुल्बसूत्रेषु प्राप्यते। तद्यथा- प्राचीनयज्ञवेदीनां निर्माणं निर्धारितमापनानुसारं भवति स्म। यज्ञवेदीनां मापनस्य क्रमोऽयं शुल्बसूत्रेषु प्राप्यते। एष एव मापनक्रमो वास्तुशास्त्रस्य मूलसिद्धान्तेष्वेकः प्रमुखस्सिद्धान्तो वर्तते। मन्दिरस्य विविधानामङ्गानां मन्दिरस्य प्रतिमायाश्च निर्माणं सर्वदा अनुशासितरीत्या निर्धारितमापन-क्रमानुसारमेव क्रियते। मन्दिराणि आध्यात्मिकोन्नतेः साधनानि सन्ति। मन्दिरेषु येषामाध्यात्मिक-तत्त्वानां विकासो दृश्यते तेषां तत्त्वानां मूलं तु वैदिकी यज्ञवेदी एव वर्तते। अनेन प्रकारेण वास्तुशास्त्रस्य मूलसम्बन्धः शुल्बसूत्रैः सह वर्तते। वास्तुशास्त्रस्य अन्यः सम्बन्धः षड्वेदाङ्गेषु ज्योतिषवेदाङ्गेन सह अपि वर्तते। अपरिमिते गगनमण्डलेऽस्मिन् यानि तेजोमयानि विम्बानि दृश्यन्ते तानि ज्योतिः शब्देन व्यह्रियन्ते तेषु यानि सदैव समानगतिकानि भवन्ति तानि नक्षत्रशब्देन उच्यन्ते यानि च भिन्न-भिन्नगतिकानि भवन्ति तानि ग्रहशब्देन उच्यन्ते।

एवंविधनक्षत्रग्रहतारकादिज्योतिर्पिण्डानां स्थितिगतिप्रभावादिवर्णन-परं शास्त्रमेव ज्योतिषपदेनाभिधीयते।[4] ज्योतिषवेदाङ्गस्य स्कन्धत्रयः सन्ति। ते च सिद्धान्त-होरा- संहिता। यथोक्तं वराहमिहिराचार्येण-

**ज्योतिः शास्त्रमनेकभेदविषयं स्कन्धत्रयाधिष्ठितं**
**तत्कात्स्न्योंपनयस्य नाम मुनिभिः सङ्कीर्त्यते संहिता।**
**स्कन्धेऽस्मिन् गणितेन या ग्रहगतिस्तन्त्राभिधानस्त्वसौ**
**होराऽन्योऽङ्गविनिश्चयश्च कथितः स्कन्धस्तृतीयोऽपरः ।।**[5]

सिद्धान्तस्कन्धे नक्षत्र-राशि-ग्रहाणाञ्चाधारेण कालस्यावबोधः क्रियते। होरास्कन्धे जन्मलग्नानुसारं जातकस्य शुभाशुभत्वं विचार्यते। संहितास्कन्धे ज्योतिषशास्त्रस्य सर्वेषां विषयाणां वर्णनं प्राप्यते। संहितास्कन्धस्य अन्तर्गतमेव वास्तुविषयस्य ज्ञानं विस्तरेण प्राप्यते। वास्तुशब्दस्यार्थो वासयोग्यस्थानं वर्तते। वास्तुशब्दस्य निष्पत्तिः वस् धातोः तुन् प्रत्यये सति भवति। वास्तुशास्त्रं गृह-प्रासाद-भवन-मन्दिराणां निर्माणस्य प्राचीनभारतीयविज्ञानमस्ति। संसारस्य प्रत्येकं पदार्थस्य निर्माणं पञ्चमहाभूतैः जायते। भवनस्य निर्माणमपि पञ्चमहाभूतैः भवति। कस्मिन्नपि भवने एतेषां पञ्चमहाभूतानां सन्तुलनं कृत्वा भवनस्य निर्माणं यदि क्रियते तर्हि मानवः स्वकीये जीवने आध्यात्मिकं भौतिकञ्च लाभं प्राप्नोति। पञ्चमहाभूतानां सन्तुलनस्य विज्ञानमेव वास्तुविज्ञानं कथ्यते।

**प्रवर्तकाचार्याः-**

भारतीयवास्तुविद्यायाः प्रारम्भः प्राचीनकालादेव दृश्यते। वेद-रामायण-महाभारत-पुराणेषु च प्राप्तविवरणानामाधारेण वक्तुं शक्यते यद् वास्तुशास्त्रस्य विकासपरम्पराप्राचीनकालदारभ्य अद्यावधि पर्यन्तमवच्छिन्नरूपेण निरन्तरं प्रचलत्येव। मत्स्यपुराणेवास्तुविद्याया अष्टादशाचार्याणामुल्लेखः कृतोऽस्ति। तद्यथा-

**भृगुरत्रिवसिष्ठश्च विश्वकर्मामयस्तथा ।**
**नारदो नग्नजिच्चैव विशालाक्षः पुरन्दरः ।।**
**ब्रह्माकुमारो नन्दीशः शौनको गर्ग एव च ।**
**वासुदेवोऽनिरुद्धश्च तथा शुक्रबृहस्पती ।।**
**अष्टादशैते विख्याता वास्तुशास्त्रोपदेशकाः ।**
**संक्षेपेणोपदिष्टं यन्मनवे मत्स्यरूपिणः ।।**[6]

अनेन प्रकारेणैव अन्यग्रन्थेष्वपि वास्तुशास्त्रस्योपदेशकानां नामोल्लेखः प्रप्यते। इमे आचार्या एव वास्तुशास्त्रं मौलिकं स्वरूपं दत्तवन्तः।

**वास्तुशास्त्रस्य महत्त्वम्-**

मानवजीवने वेदवेदाङ्गोपाङ्गानां महत्त्वपूर्णं स्थानमस्ति। यथा हि वेदाङ्गस्वरूपज्योतिषशास्त्रस्य मानवजीवनस्य सम्पूर्णघटनानां विचारणे महत्त्वपूर्णं स्थानमस्ति तथैव वास्तुशास्त्रस्यापि महदुपयोगिता वर्तते। **'यत् पिण्डे तत् ब्रह्माण्डे'** सिद्धान्तानुसारं सम्पूर्णब्रह्माण्डोऽयं पञ्चमहाभूतैः निर्मितम्। अत एतेषां सामञ्जस्येन निर्मितगृहे निवासकर्तुं वास्तुशास्त्रस्य महत्त्वमत्यावश्यकं वर्तते। कथ्यते यत् यस्मिन् शास्त्रे गृहभवननिर्माणसम्बन्धितविषयाः भवन्ति तथा च मानवानां सुखसौविध्यप्राप्त्यार्थं नियमानां प्रतिपादनं भवति तत् शास्त्रं वास्तुशास्त्रमित्युच्यते। जगति प्राणीनामावासः नितान्तमावश्यकम्। मनुष्येऽन्येभ्यः जीवेभ्यः श्रेष्ठः तस्मात् स्वनिवासार्थं सम्यक्चिन्तनं कृत्वा वैज्ञानिकरीत्या सुखसुविधासम्पन्नगृहस्य निर्माणं करोति। यतोहि सर्वेषां जीवानामाश्रयस्थानं सुखस्थानं वा गृहं भवति। मानवस्य जीवनं सुखपूर्वकं सुरक्षापूर्वकञ्चभवेत्, विपरीतपरिस्थि-तिभिः कष्टं न जायेत्, एतदर्थं निवासस्थानस्य व्यवस्था परिकल्पिता वर्तते। मानवस्य जीवने पुरुषार्थानां सिद्धयर्थमावासस्यावश्यकता भवत्येव। अत एव वास्तुविद्भिः शीतोष्णवर्षादिभिः मनुष्याणां रक्षणार्थं गृहनिर्माणं निर्दिष्टम्। यथोक्तम्-

**स्त्रीपुत्रादिकभोगसौख्यजननंधर्म्मार्थकामप्रदम्**
**जन्तूनामयनं सुखास्पदमिदं शीताम्बुघर्मापहम्।**
**वापीदेवगृहादिपुण्यमखिलंगेहात्समुत्पद्यते**
**गेहं पूर्वमुशन्ति तेन विबुधाः श्रीविश्वकर्मादयः॥**[7]

वास्तुशास्त्रं मनुष्यस्य प्रकृत्यनुसारं प्रवर्तयितुं स्वविकासाय च प्रेरयितुं यतते। अस्य क्षेत्रं बहुव्यापकं वर्तते। शास्त्रमिदं पदे पदे स्वकल्पनानुसारं व्यवस्थितवास्तुसिद्धान्तानामाधारेण प्रकृतिसा-मञ्जस्यपूर्वकं कार्यानुष्ठानस्य निर्देशं प्रददाति। मानवः स्वेच्छानां पूर्त्यार्थं नैसर्गिकभावेन गृहस्य निर्माणं करोति। अत एव निवासयोग्यस्थानं वास्तुरिति कथ्यते, यस्मिन्गृहे गृहजनाः पुण्यकार्याणि कुर्वन्ति, तदर्थमेव विश्वकर्मादयः देवाः प्रथमतः गृहनिर्माणस्य विषये अकथयन्।

**पाद टिप्पणी :-**

[1]मनुस्मृति- अ.-०२, श्लो.-०६

[2]तत्रैव-अ.- १२, श्लो.-९७

[3]पाणिनीय शिक्षा.- श्लो.सं.-०८

[4]भारतीय ज्योतिष शास्त्र पृ. स. - ०३

[5]बृहत्संहिता.- अ.-०१, श्लो.-०७

[6]मत्स्यपुराण-अ.- २५१ श्लो.-२-४

[7]वृहद्वास्तुमाला, गृहारम्भविधिः– श्लो.स.- ०४